Ketu Stotra - Hindi

|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## अथ केतु स्तोत्रं

अस्य श्री केतु स्तोत्र महामंत्रस्य वामदेव ऋषिः। अनुष्टुप्छंदः। केतुर्देवता। केतु ग्रह प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ गौतम उवाच। मुनींद्र सूत्रत्वज्ञ सर्वशास्त्र विशारदः। केतुग्रहोपेत स्तानां ब्रह्मणा कीर्तितं पुरा। एकः कराळ वदनो द्वितीयो रक्तलोचनः। तृतीयः पिंगळाक्षश्च चतुर्थोपि विदाहकः। पंचमे कपिलाक्षं च षष्ठिः कालाग्नि सन्निभः। सप्तमे हिमगर्भश्च च धूम्रवर्णोष्टमं तथा। नवमः पापकंठश्च दशमे नरपीडकः। एकादशस्तु श्रीकंठो वनमाला विभूषणः। द्वादशैते महाक्रूराः सर्वोपद्रवकारकः। पीड्ये ते सर्वकालेषु दिवाकर निशाकरौ। कलशे नीलवर्णाभे प्रभाकर निशाकरौ। निक्षिप्ययेतु षट्कोणे पद्मेचाष्टदळे क्रमात्। केतुं कराळवदनं सर्वलोक भयंकरं। प्रतिमां वस्त्रसंयुक्तां चित्रांचैव प्रदावयेत्। दानेनानेन सुप्रीतो भवेयुः सुखदायिनः। वत्सरं प्रयता भूत्वा पूजयंति नरोत्तमाः। मूलमष्टोत्तरशतं ये जपंति नरोत्तमाः। तेषां केतु प्रसादेन न कदाचित्भयं भवेत्॥ इति ब्रह्मांड पुराणे वामदेव संवादे केतु स्तोत्रं॥

**Please consider the environment -**

**do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com